# QUESTION PAPERS

2024

aglasem.com

कक्षा एकादशी

विषय – संस्कृत

समय – 3 घण्टे | पूर्णांक–80

**खण्डः –क (अपठितांश–अवबोधनम्)**

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत –**

एकतायां महती शक्तिः विद्यते। एकः चणकः भ्राष्ट्रं भङक्तुं न शक्नोति। एकः एकः च मिलित्वा एकादशः भवतः, न द्वौ। यत् दुःसाध्यं कार्यं बलवान् अपि सन् कर्तुं न पारयति तत् कार्यं बहवः जनाः दुर्बलाः सन्तः अपि एकत्रीभूय सम्पादयन्ति। अत एव प्राचीनकालादेव धर्मग्रन्थेषु संघस्य महत्त्वं प्रतिपादितं वर्तते। वैदिकसाहित्यस्य निम्नस्थं मन्त्रम् उद्धरणीयं वर्तते– संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्। संघस्य महत्त्वस्य अनेकानि उदाहरणानि दैनिक–जीवने उपलभ्यन्ते। तृणानि कीदृशानि दुर्बलानि तुच्छानि च भवन्ति। पृथक्–पृथक् स्थितम् एकं तृणं किमपि कर्तुं न प्रभवति। परं यदा तृणानि एकत्रीभूय रज्जुरूपं धारयन्ति, तदा तेषां शक्तिः वर्धते। रज्जुरूपं आपन्नानि तृणानि मत्तान् गजान् अपि बध्नन्ति।

(अ) एकपदेन उत्तरत–

(क) एकतायां कीदृशी शक्तिः वर्तते ? (1)

(ख) एकः एकः च मिलित्वा कति भवतः ? (1)

(ब) पूर्णवाक्येन उत्तरत–

(क) तृणानि कदा मत्तान् गजान् अपि बध्नन्ति ? (1)

(ख) 'एकत्रीभूय सम्पादयन्ति' अत्र क्रियापदं किमस्ति ? (1)

(ग) 'मिलित्वा' इति पदे कः धातुः कः प्रत्ययः च प्रयुक्तः ? (1)

(घ) 'चेतांसि' इत्यस्य अत्र कः पर्यायः प्रयुक्तः ? (1)

(ङ) 'मत्तान् गजान्' अत्र विशेष्य पदं चिनुत ? (1)

(च) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (1)

**खण्डः–ख (रचनात्मकं कार्यं)**

2. 'अभिज्ञानशाकुन्तलस्य' वैशिष्ट्यम् अधिकृत्य मित्रं प्रति पत्रं लिखत।
(कालिदासस्य,महाभारतात्,दुर्वासा,शकुन्तलोपाख्यानः,शापस्य,चतुर्थांके,पितृगमनं,चेतनाचेतना, शृंगाररसः,चरित्रचित्रणम्)। अथवा
स्वप्नवासवदत्तस्य वैशिष्ट्यमधिकृत्य निर्दिष्ट शब्दसाहायेन पितरं प्रति पत्रं लिखत–
(पितृपादाः,नाटकीय,कौशलम्,कुशली,नमस्कारः,स्वप्नवासवदत्तनाटकम्,भासः,उदयनः,नायिका, वासवदत्ता,पतिव्रता,षट्,अंकाः,पुत्रः)। (4)

3. महाकविबाणभट्टस्योरुपरि अथवा महाकविकालिदासस्योपपरि अनुच्छेदं लिखत। (4)

**खण्डः–ग (अनुप्रयुक्त–व्याकरणम्)**

4. (क) निम्नलिखित में से किन्हीं चार वर्णों के उच्चारण स्थान लिखो– ( 4*1/2=2)
च, त, ए, म, ब।

(ख) निम्नलिखित में से किन्हीं तीन पदों का सन्धि या सन्धिविच्छेद करो– (3)
शिष्ट+आचारः, गणेशः, सु+आगतम्, प्रत्येकं नमः+ते ।

(ग) निम्नलिखित वाक्यों में किन्हीं चार शब्द रूप में उचित विभक्ति लगाकर रिक्त स्थानों की पूर्ति करो– (4)

1. ......... भवन्तु सुखिनः। (सर्व शब्द)
2.लतापरीक्षायां..........आसीत्। (प्रथम शब्द)
3.अस्माकं.........चित्रं शोभनम् आसीत्। (पूर्व शब्द)
4.कृष्णः सुदामा च द्वौ...........आस्ताम्। (सखि शब्द)

(घ) निम्नलिखित वाक्यों में उचित धातु लगाकर रिक्त स्थानों की पूर्ति करो– (4)

1.वयं प्रतिदिनं संस्कृतं ......... (पठ्+लृट् लकार)
2.ते सदा ईश्वरं ....... (नम्+लट्कार)
3.अहं विद्यालयम् .......... (गम्+लङ् लकार)
4.भो जनाः! उच्चैः ......... (वद्+लोट् लकार

schools.aglasem.com

aglasem.com

5. (क) निम्नलिखित अव्ययों का वाक्य में प्रयोग करो– ( 4*1/2=2)

| ऋते, श्वः ,चिरं, उच्चैः |
|---|

1.लता .................वदति।
2. भवान् ................... कथम् आयातः।
3. ...................रविवासरः अस्ति।
4.परिश्रमात्........... सफलता न लभते।

(ख) निम्नलिखित वाक्यों को शुद्ध करके लिखो– ( 4*1/2=2)
1.विद्यालयस्य परितः वृक्षाः सन्ति।
2.सः नेत्रात् काणः अस्ति।
3.सूर्यं नमः।
4.बालः सर्पेण विभेति।

(ग) निम्नलिखित में से किन्हीं तीन प्रकृति प्रत्यय विभाग कीजिए– (3x1=3)
गच्छन्, त्यक्त्वा, प्रणम्य, अजा, पठनीय।

(घ) निम्नलिखित में से किन्हीं तीन समस्तपदों का विग्रह करके समास का नाम लिखिए–
उपकृष्णम्, अष्टाध्यायी, पितरौ, राजपुरुषः। (3x1=3)

**खण्डः–ग (अ) (पठितांश–अवबोधनम्)**

6. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–
बोधिसत्त्वः किल करिमंश्चित् नातिमहति कमलकुवलयादिविभूषितसलिले हंसचक्रवाकादिशोभिते तीरान्ततरूकुसुमावकीर्णे सरसि मत्स्याधिपतिः बभूव। बहुषु जन्मान्तरेषु परोपकाराभ्यासवशात् तत्रस्थः अपि परहितसुखसाधने व्यापृतः अभवत्।
(अ) एकपदेन उत्तरत–
(क)कथायां वर्णिते जन्मनि बोधिसत्त्वः कः बभूव ? (1)
(ब) पूर्णवाक्येन उत्तरत–
(ख)बोधिसत्त्वः तत्रस्थः अपि कस्मिन् व्यापृतः अभवत् ? (1)
(ग) 'कमलकुवलयादिविभूषित सलिले'अत्र किं विशेष्यपदम् ? (1)
(घ)'अतिमहति' शब्दस्य अत्र विपरीतार्थकः कः शब्दः ? (1)
अथवा
(ङ)'अभवत्' अत्र कः धातुः कश्च लकारः ?

7. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–
ते ब्रह्मचर्येण विशुद्धवीर्याः,ज्ञानेन ते भीमतपोभिरार्याः।
सहस्रसूर्या इव भासुरास्ते,समृद्धिमत्यां शुशुभुर्धरित्र्याम्।।
प्रश्नाः
(अ) एकपदेन उत्तरत–
(क)ते केन विशुद्धवीर्याः ? (1)
(ब) पूर्णवाक्येन उत्तरत–
(ख).अस्मिन् श्लोके भारतीयानां वीरता विषये किं वर्णितमस्ति ? (1)
(ग)भासुरास्ते शब्दस्य सन्धिविच्छेदं कृत्वा सन्ध्याः नाममपि लिखतु। (1)
(घ)'दिवाकर' शब्दस्य पर्यायवाची अत्र कः शब्दः अस्ति ? (1)
अथवा
(ङ).'भीमतपोभिः आर्याः' अत्र विशेषणपदं किम्?

8. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–
रदनिका– (सनिर्वेदं निःश्वस्य)
जात! कुतोऽस्माकं सुवर्णव्यवहारः? तातस्य पुनरपि ऋद्धया सुवर्णशकटिकया क्रीडिष्यसि।(स्वगतम्) तद्यावद् विनोदयाम्येनम्। आर्यायाः वसन्तसेनायाः समीपमुपसर्पिष्यामि। (उपसृत्य) आर्ये! प्रणमामि।
प्रश्नाः
(अ) एकपदेन उत्तरत–
(क) रदनिका कस्याः समीपं गच्छति? (1)
(ब) पूर्णवाक्येन उत्तरत–
(ख) कस्य ऋद्धया सुवर्णशकटिकया क्रीडिष्यसि? (1)
(ग) 'क्रीडिष्यसि' इति क्रियापदस्य अत्र कः कर्ता? (1)
(घ) पितुः इत्यस्य अत्र कः पर्यायः प्रयुक्तः? (1)
अथवा
(ङ) 'प्रणमामि' इति पदे कः लकारः?

schools.aglasem.com
aglasem.com

9. कयोः द्वयोः हिन्दीभाषायां सप्रसंगभावार्थं स्पष्टीकुरूत– (2x2=4)
(क) अनलंकृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।
(ख) कुसुमैः पश्य सौमित्रे! क्रीडन्निव समन्ततः।
(ग) भो जागृतास्मि क्व धनुः क्व खड्गः उत्तिष्ठतोत्तिष्ठत सुप्तसिंहाः।

10. वस्तुनिष्ठ प्रश्नः– निम्नलिखित प्रत्येक प्रश्न 1 अंक का है, उसके चार विकल्प दिए जा रहे है, जिनमें से केवल एक सही है, इनमें से सही विकल्प लिखिए:–
(१) चरकसंहितायाः रचयिता कः?
(क) भासः (ख)कालिदासः
(ग) चरकः (घ) माघः
(२) शक्रः केषां राजा आसीत्?
(क) मनुष्याणां (ख) देवानां
(ग) पक्षीणां (घ) न कोऽपि
(३) निष्कुटकेषु का आहिता?
(क) कण्टकिनी (ख) ज्ञानगंगा
(ग) क्रन्दनं (घ)शान्तिः
(४) रोहसेनः कस्य पुत्रः आसीत्?
(क) शूद्रकस्य (ख) चारुदत्तस्य
(ग) वसन्तसेनायाः (घ) रदनिकायाः
(५) पृथिवीसूक्तं कस्मिन् वेदे विद्यते?
(क) ऋग्वेदे (ख) सामवेदे
(ग) यजुर्वेदे (घ) अथर्ववेदे
(६) रजन्यां गूढा माता अरिभिः विनष्टा। (रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरूत)
(क) काम् (ख) कस्यै
(ग) कैः (घ) कया
(७) पुरुषपरीक्षायाः लेखकः विद्यापतिः। (रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरूत)
(क) केन (ख) कस्मै
(ग) कस्य (घ) कः
(८) प्रस्तरखण्डान् जनपदरथ्यकर्ता दारयते। (रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरूत)
(क) कस्मिन् (ख) कान्
(ग) कस्य (घ) केभ्यः
(९) शरदृतौ चन्द्रः कीदृशः भवति?
(क) निर्मलः (ख) विमलः
(ग) स्वच्छः (घ) न कोऽपि
(१०)संजय!सर्वभूतानि यम्...................पक्वं दुम्रं....................आसाद्य आजीवन्ति, तस्य...................अर्थवत्। (अन्वयं कुरूत)
(क) इव,जीवितम्,पुरुषं (ख) जीवितम्,इव,पुरुषं
(ग) पुरुषं,इव,जीवितम् (घ) न कोऽपि (10*1=10)

## खण्डः– घ (आ) (संस्कृत–साहित्येतिहासः)

11. निम्नलिखित में से किन्हीं दो विषयों पर संक्षिप्त टिप्पणी लिखिए– (2x2.5=5)
1. महाभारत
2. ऋग्वेद
3. प्रो0 निवासरथ

12. वस्तुनिष्ठ प्रश्नः– निम्नलिखित प्रत्येक प्रश्न 1 अंक का है, उसके चार विकल्प दिए जा रहे है, जिनमें से केवल एक सही है, इनमें से सही विकल्प लिखिए:– (6)
(१) रामायण में कितने श्लोक हैं?
(क) एक लाख (ख) दस हजार
(ग) चौबीस हजार (घ) सात सौ
(२) अथर्ववेद के ऋत्विज् का नाम बताओ ?
(क) होता (ख) ब्रह्मा
(ग) अध्वर्यु (घ) उद्गाता
(३) जातकमाला के लेखक कौन हैं?
(क) वाल्मीकि (ख) वेदव्यास
(ग) चरक (घ) आर्यशूर
(४) शतकत्रय में किसकी गणना नहीं होती है?
(क) नीतिशतक (ख) वैराग्यशतक
(ग) श्रृंगारशतक (घ) रीतिशतक

schools.aglasem.com
aglasem.com

(५) किरातार्जुनीयम् के लेखक कौन हैं?

(क) माघ (ख) भारवि

(ग) हर्ष (घ) वाणभट्ट

(६) इनमें से कालिदास की रचना नहीं हैं?

(क) मेघदूत (ख) महावीरचरितम्

(ग) रघुवंशम् (घ) कुमारसम्भवम् (6*1=6)

13. निम्न में से किन्हीं दो शब्दों पर टिप्पणी लिखिए– (2x2=4)

1.प्रस्तावना 2.नेपथ्य 3.भरतवाक्यम्।

*********************************

schools.aglasem.com

AglaSem Earn while Learn Program. Send your papers and get paid.
Contact: support@aglasem.com aglasem.com

# QUESTION PAPERS

GET PREVIOUS YEAR QUESTION PAPERS FOR ALL CLASSES FOR CBSE, ISCSE, ISC AND ALL ALL STATE BOARDS HERE AT AGLASEM.COM

BOARD WISE

- Andhra Pradesh Board Question Papers
- Assam Board Question Papers
- Bihar Board Question Papers
- Chhattisgarh Board Question Papers
- Goa Board Question Papers
- Gujarat Board Question Papers
- Haryana Board Question Papers
- Himachal Pradesh Board Question Papers
- J&K State Board Question Papers
- Jharkhand Board Question Papers
- Karnataka Board Question Papers
- Kerala Board Question Papers
- Madhya Pradesh Board Question Papers
- Maharashtra State Board Question Papers
- Manipur Board Question Papers
- Meghalaya Board Question Papers
- Mizoram Board Question Papers
- Nagaland Board Question Papers
- Orissa Board Question Papers
- Punjab Board Question Papers
- Rajasthan Board Question Papers
- Tamil Nadu Board Question Papers
- Telangana State Board Question Papers
- Tripura Board Question Papers
- Uttarakhand Board Question Papers
- Uttar Pradesh (UP) Board Question Papers
- West Bengal (WB) Board Question Papers